# अभ्यास–प्रश्नपत्रम्

## विषयः – संस्कृत (प्रतिभा)

## कक्षा – अष्टमी

समयः – सार्धहोराद्वयम् पूर्णाङ्काः– 60

**सामान्यनिर्देशा:**

(1) प्रश्नपत्रेचत्वारःखण्डाःसन्ति।

| | | |
|---|---|---|
| **खण्ड:'क'** | अपठित-अवबोधनम्8 अङ्काः | |
| **खण्ड: 'ख'** | रचनात्मक-कार्यम् | 12 अङ्काः |
| **खण्ड: 'ग'** | अनुप्रयुक्त-व्याकरणम् | 18अङ्काः |
| **खण्ड: 'घ'** | पठित-अवबोधनम् | 22 अङ्काः |

(2) सर्वेप्रश्नाःअनिवार्याः।

(3) उत्तराणिसंस्कृतेनएवंलेखनीयानि।

(4) प्रश्न-संख्याअवश्यमेवलेखनीया।

### खण्ड: 'क'

### अपठित-अवबोधनम् (8 अङ्काः )

**1. अधोलिखितम्अनुच्छेदंपठित्वाप्रदत्तप्रश्नान्संस्कृतेनउत्तरत–**

**"उत्सवप्रियाः खलु मनुष्याः"**इति कालिदासस्य उक्तिः। एताम् उक्तिं स्वीकृत्य भारते देशे जनाः प्रतिदिनं प्रतिमासं च किमपि पर्व मानयन्ति। पर्वसु दीपावली अन्यतमं पर्व अस्ति। जनाः अस्मिन् दिने स्व–स्वगृहे दीपान् प्रज्वालयन्ति। दीपावली–उत्सवं कार्तिकी अमावास्यायां सम्पद्यते। अमावास्यातः पञ्चदशदिवसपूर्वमेव जनाः स्वेषां गृहाणां स्वच्छतां सम्पादयन्ति। केचन जनाः सुधया भवनं लिम्पन्ति। अस्मात् पर्वणः प्राक् वर्षर्तुः भवति, गृहे यत्र–तत्र सर्वत्र मलिनता जायते। गृहे विविधाः कीटपतङ्गादयः आगच्छन्ति। एतस्य पर्वणः व्याजेन गृहे सर्वत्र स्वच्छता भवति। दीपावलि–पर्व, सर्वे आबालवृद्धाः अत्यन्त–हर्षोल्लासेन मानयन्ति।

**अ) एकपदेन उत्तरत - (केवलं प्रश्नत्रयम्)** 1×3=3

i) "उत्सवप्रियाः खलु मनुष्याः" इति कस्य उक्तिः?

ii) दीपावलीउत्सवं कदा सम्पद्यते–?

iii) जनाः कया भवनं लिम्पन्ति?

iv) दीपावलि ,पर्व–के अत्यन्त?हर्षोल्लासेन मानयन्ति–

**ब) पूर्णवाक्येनउत्तरत– (केवलं प्रश्नमेकम्)** 2x1=2

i) पर्वसु किम् अन्यतमं पर्व अस्ति?

ii) गृहे विविधाः के आगच्छन्ति?

**स) यथानिर्देशम् उत्तरत- (केवल प्रश्नद्वयम्)** 1×2=2

i) 'मलिनता' इतिपदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) स्वच्छता(ख)दीपावली(ग)पर्व (घ)जनाः

ii) 'जनाः' इत्यस्य विशेषणपदम्अत्र गद्यांशे किम् प्रयुक्तम् अस्ति?

(क) लिम्पन्ति(ख)भवनं(ग)केचन (घ) सुधया

iii)'दीपकान्'इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(क) दीपावली(ख)दीपान्(ग)सम्पादयन्ति (घ) पर्व

**द) अस्य अनुच्छदेस्य कृते उचितं शीर्षकं लिखत।**1 ×1=1

**खण्डः 'ख'**

**रचनात्मककार्यम् (12अङ्काः )**

**2. अधः प्रदत्तंचित्रंदृष्ट्वामञ्जूषायांप्रदत्तशब्दानांसहायतयाचत्वारिवाक्यानिलिखत**–2×4=8

**मञ्जूषा**

| |
|---|
| पर्यावरणम्, दूषितं, जलम्, वृक्षाः,मत्स्याः, पृथिवी, वनं, कर्तयन्ति, जनाः, भवति, स्वच्छवायुः, मरन्ति, धूम्रम्, औद्योगिकस्थलानि वाहनानि |



अथवा

**'मम परिवारः'**इतिविषयम् अधिकृत्य चत्वारि वाक्यानि लिखत।

**3. पदानि मेलनं कृत्वा वाक्यरचनां कुरुत** – 1x4= 4

i. धावकः कन्दुकम् वददति

ii. क्षिपतिबालकाःपठन्ति

iii. पुस्तकं मयूरः छात्रः

iv. श्लोकं करोति नृत्यं

**खण्डः 'ग'**

**अनुप्रयुक्तव्याकरणम् (18 अङ्काः)**

**4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नत्रयम्)**1×3=3

i) सूर्यास्तसमयेदधिपुच्छः महतीं गुहां दृष्टवान्।

ii) महाविद्यालये च+अपि शुल्कं प्रदीयते।

iii) डेबिट कार्ड क्रेडिट कार्ड इत्यादयः सर्वत्र रुप्यकाणां स्थानं गृहीतवन्तः।

iv) कर्गद+उद्योगे वृक्षाणाम उपयोगेन वृक्षाः कर्त्यन्ते।

**5. उदाहरणंदृष्ट्वावर्णविच्छेदंलिखत–(केवलं प्रश्नत्रयम्)**1x3=3

यथा - बालकः = ब् + आ + ल् + अ + क् + अः

क) पुस्तकम् =

ख) प्रखराः=

ग) स्मरणम्=

घ) अध्यापिका=

**6. वर्णसंयोजनेनपदंलिखत–(केवलं प्रश्नत्रयम्)** 1x3=3

यथा – व् + ऋ + थ् + आ= वृथा

क) श् + उ + ल् + क् + अ + म् =

ख) व् + इ + न् + अ + ष् + ट्+अः =

ग) द्+ ऋ + ष् + ट् + व्+ आ =

घ) भ्+ऊ+त्+व्+ आ =

**7. अङ्कानां कृते मञ्जूषातः चित्वा उचितं पदं पूरयत– (केवलं प्रश्नत्रयम्)** 1x3=3

**मञ्जूषा**

| |
|---|
| पञ्चाशत्, सप्तविंशतिः, त्रयस्त्रिंशत्, अशीतिः |

72 ……………………… 80 …………………..

50 ……………………… 33 ……………………..

**8. (क) उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत– (केवलं प्रश्नत्रयम्)**1x3=3

i) वने ……….. नाम सिंहः प्रतिवसति स्म। खरनखरः/ खरनखरात्

ii) महतीं ……………. दृष्ट्वा सिंहः अचिन्तयत् । गुहायां/ गुहां

iii) कालपरिवर्तनेन सह …………… आवश्यकता अपि परिवर्तते। मानवः/ मानवस्य

iv) इमानि सप्त …………… सन्ति। राज्यम्/ राज्यानि

**8. (ख) उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत– (केवलं प्रश्नत्रयम्)**1x3=3

ख) अस्माकं देशे अष्टाविंशतिः राज्यानि …………..। स्तः/ सन्ति

ग) मम कौतूहलं शान्तिं न ………… । गच्छतः/ गच्छति

घ) स्वकीयं बलं साधनं ………….। भवति/भवतः

ङ) वयं सौकर्येण यात्रायाः आनन्दं ………….। गृह्णाति/ गृह्णीमः।

**खण्ड: 'घ'**

**पठितअवबोधनम् (22अङ्का:)**

**9. अधोलिखितंगद्यांशंपठित्वाप्रश्नान्उत्तरत-**

अधुना आपणे वस्तुक्रयार्थम् रुप्यकाणाम् अनिवार्यता नास्ति। "डेबिट कार्ड""क्रेडिट कार्ड" इत्यादयः सर्वत्र रूप्यकाणां स्थानं गृहीतवन्तः । वित्तकोशस्य (बैंकस्य) कार्याणि चापि सर्वाणि कार्याणि सङ्गणकयन्त्रेण सम्पाद्यन्ते।कुत्रापि यात्रा करणीया भवेत् रेलयानयात्रापत्रस्य, वायुयानयात्रापत्रस्य अनिवार्यता अद्य नास्ति। सर्वाणि पत्राणि अस्माकं चलदूरभाषयन्त्रे 'ई-मेल' इति स्थाने सुरक्षितानि भवन्ति यानि सन्दर्श्य वयं सौकर्येण यात्रायाः आनन्दं गृह्णीमः । चिकित्सालयेऽपि उपचारार्थं रूप्यकाणाम् आवश्यकताद्य नानुभूयते । सर्वत्र कार्डमाध्यमेन, ई- बैंकमाध्यमेन शुल्कं प्रदातुं शक्यते।

**अ) एकपदेनउत्तरत– (केवलं प्रश्नमेकम्)**1x1 = 1

i. आपणे वस्तुक्रयार्थम् केषाम् अनिवार्यता नास्ति ?

ii. सर्वत्र कार्डमाध्यमेन, ई बैंकमाध्यमेन -किं प्रदातुं शक्यते?

**ब) पूर्णवाक्येनउत्तरत –(केवलं प्रश्नमेकम्)**2x1 = 2

i. सर्वाणि पत्राणि अस्माकं चलदूरभाषयन्त्रे कस्मिन् स्थाने सुरक्षितानि भवन्ति?

ii. यात्रायाम् कस्य अनिवार्यता अद्य नास्ति?

**स) यथानिर्देशम्उत्तरत- (केवलं प्रश्नद्वयम्)**1x2 = 2

i. 'सर्वाणि कार्याणि' अनयोः पदयोः किं विशेष्यपदम् अस्ति?

क)कार्याणिख) सर्वाणिग) अनयोः पदयोःघ) न किमपि

ii. 'दुःखम्' पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

क) पत्रम् ख) कार्याणिग) आनन्दम्घ)वित्तकोशः

iii) "वयं सौकर्येण यात्रायाः आनन्दं गृह्णीमः" अत्र किं क्रियापदम्?

क) वयं ख) गृह्णीमःग) आनन्दम्घ)सौकर्येण

**10. अधोलिखितंपद्यांशंपठित्वाप्रश्नान्उत्तरत-**

चल चल पुरतो निधेहि चरणम् । सदैव पुरतो निधेहि चरणम्॥

गिरिशिखरे ननु निजनिकेतनम्। विनैव यानं नगारोहणम् बलं स्वकीयं भवति साधनम्।

पथि पाषाणाः विषमाः प्रखराः।हिंस्राः पशवः परितो घोराः ॥

सुदुष्करं खलु यद्यपि गमनम्सदैव पुरतो निधेहि चरणम्॥

**अ) एकपदेनउत्तरत– (केवलं प्रश्नमेकम्)**1x1 = 1

i. सदैव पुरतोकिं निधेहि ?

ii. विनैव यानं कुत्र आरोहणं कर्तुं शक्यते?

**ब) पूर्णवाक्येनउत्तरत –(केवलं प्रश्नमेकम्)**2x1 = 2

i. कुत्र ननु निजनिकेतनम्कर्तुं शक्यते?

ii. पथि के विषमाः प्रखराः सन्ति?

**स) यथानिर्देशम्उत्तरत-(केवलं प्रश्नद्वयम्)**1x2 = 2

i. 'पाषाणाः' अत्र का विभक्तिः अस्ति?

क)प्रथमाख) पञ्चमीग) सप्तमीघ) द्वितीया

ii. 'गिरिशिखरे' पदस्य किं पर्यायपदं पद्यांशे प्रयुक्तम् ?

क) हिमालयशिखरेख) राष्ट्रशिखरेग)गिरिशिखरेघ)मस्तकशिखरे

iii. 'परकीयम्' पदस्य किं विलोमपदं पद्यांशे प्रयुक्तम् ?

क)नगारोहणम् ख) स्वकीयंग)बलंघ)साधनम्

**10. अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–**

**राजीवः**– गृहे यथा सर्वाधिका रम्या मनोरमा च भगिनी भवति तथैव भारतगृहेऽपि सर्वाधिकाः रम्याः इमाः सप्तभगिन्यः सन्ति । **अध्यापिका**–मनस्यागता ते इयं भावना परमकल्याणमयी परं सर्वे न तथा अवगच्छन्ति। अस्तु, अस्ति तावदेतेषां विषये किञ्चिद् वैशिष्ट्यमपि कथनीयम्। सावहितमनसा शृणुत–

जनजातिबहुलप्रदेशोऽयम् । गारो - खासी-नगा - मिजो-प्रभृतयः बहवः जनजातीयाः अत्र निवसन्ति। शरीरेण ऊर्जस्विनः एतत्प्रादेशिकाः बहुभाषाभिः समन्विताः, पर्वपरम्पराभिः परिपूरिताः, स्वलीलाकलाभिश्च निष्णाताः सन्ति ।

**मालती**– महोदये! तत्र तु वंशवृक्षा अपि प्राप्यन्ते?

**अ) एकपदेनउत्तरत– (केवलं प्रश्नमेकम्)**1x1 = 1

i. भारतगृहेऽपि सर्वाधिकाः रम्याः काः सन्ति?

ii. गृहे सर्वाधिका रम्या मनोरमा च का भवति ??

**ब) पूर्णवाक्येनउत्तरत –(केवलं प्रश्नमेकम्)**2x1 = 2

i. काः काः जनजातीयाः अत्र निवसन्ति?

ii. शरीरेण ऊर्जस्विनः एतत्प्रादेशिकाः कैः निष्णाताः सन्ति?

स) **यथानिर्देशम्उत्तरत-(केवलं प्रश्नद्वयम्)**1x2 = 2

i. 'भगिन्यः' अत्र का विभक्तिः अस्ति?

क)द्वितीयाख) प्रथमाग) सप्तमीघ) पञ्चमी

ii. 'मनोरमा भगिनी' अनयोः पदयोः किं विशेषणपदम् अस्ति ?

क) मनोरमाख) भगिनीग)मनःघ)रमा

iii. 'कुशलाः'पदस्य किं पर्यायपदम् गद्यांशे प्रयुक्तम् अस्ति ?

क) प्रख्याताःख) प्रभृतयःग)समन्विताःघ)निष्णाताः

**11. मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत**–1x4= 4

पथि पाषाणाः विषमाः प्रखराः, हिंस्राः पशवः परितो घोराः ।

सुदुष्करं खलु यद्यपि गमनम्सदैव पुरतो निधेहि चरणम्।।

**मञ्जूषा**

| |
|---|
| चरणम्,गमनम्, पाषाणाः, हिंस्राः |

**अन्वयः**–पथि विषमाः प्रखराः……(i)……. प्रसृताः सन्ति, परितो घोराः ……(ii)……पशवः भ्रमन्ति।

यद्यपि खलुसुदुष्करं….(iii)…. अस्ति, पुनरपि सदैव पुरतो (iv)……….निधेहि।।

**12. विशेष्य–विशेषणपदानाम् उचितं मेलनंकुरुत–** **1x3=3**

अयम् इतिहासे

इमानि संस्कृतिः

प्राचीने प्रदेशः

महत्वाधायिनी राज्यानि